रत्नपरीक्षाटीका

श्री ५ को सरकार
वीर पुस्तकालय
२०१६

पं० बुद्धिसागरशर्मणः

अध्यक्षतायां

वीरपुस्तकालयद्वारा
संपादिता प्रकाशिता च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरातत्त्वप्रकाशनमाला :-

रत्नपरीक्षाटीका

पं० बुद्धिसागरशर्मणः

अध्यक्षतायां

वीरपुस्तकालयद्वारा
संपादिता प्रकाशिता च

वि० सं० २०२० फाल्गुण ७ गते मूल्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

पुस्तकालयीयं वक्तव्यम्:-

अथेयं प्रस्तूयते सर्वेषां पुरतो रत्नपरीक्षा टीका रत्नप्रवेकमधिकृत्य बुद्ध भट्टेन रचिताया रत्नपरीक्षाया इयं टीका। रत्नपरीक्षा अस्माभिः पूर्वमेव पाठकानां पुरतः स्थापिता। तस्या एवयं टीका अपूर्णा। अस्माकं मनसि मूलेन सहैव टीकाया अपि प्रकाशने इच्छा आसीत्, परन्तु मुद्रणामयस्य प्रमादेन सहैव प्रकाशं नागता। तथा प प्रयत्नतः संपादितस्यास्य प्रकाशनं रत्नपरीक्षाया अर्थज्ञानाय उपकारावहमेव विचार्य स्वल्पपुस्तिकारूपेण प्रकाशिता। अस्माभिः प्रकाशिते मूले अस्यां टीकायां च पाठक्रमस्य भेदो दृश्यते, तथापि रत्नशास्त्रस्याध्ययने सावधाना विद्वांसः पूर्वापरं समीक्ष्य मूलग्रन्थस्य टीकाग्रन्थस्य च स्वल्पकलेवरत्वेन स्वल्पेनैव आयासेन लाभान्विता भविष्यन्ति। टीकाया पाण्डुलिपेः क्रमश्च यथावत् सुरक्षितो भविष्यतीति विचिन्त्य प्रकाशितमूलानुसारि पाठपरिवर्तनं न कृतम्। संभाव्यते तदिदं प्रकाशनं विश्वाम्मिन् सर्वप्रथमं प्रकाशनं भवेदिति लोकस्य हितायैव भवेदिति। अत्र प्रकाशने कृतश्रमः पं० कृष्णप्रसादः, संशोधने कृतश्रमः पं० दामोदरः, अन्ये च कर्मचारिणोऽवश्यं धन्यवादार्हा इति च विश्वसिति।

बुद्धिसागरः पराजुलिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ रत्नपरीक्षा टीका



ॐनमः शिवाय ॥ इह खलु बुद्धभटः श्रोतृजनानां शुभसंसूचनार्थं रत्नत्रयायेत्यादिना इष्टदेवतानमस्कारपूर्वकमभिधेयप्रयोजने प्राह ॥ ॥ रत्नानां त्रयं रत्नत्रयम् । कतमद्बुद्धरत्नं धर्म्मरत्नं सङ्घरत्नमिति ॥ तस्मै रत्नत्रयाय । की दृशाय । भुवनानान्त्रयम्भुवनत्रयन्तेन तत्र वा वन्दिताय प्रणमिताय ॥ तथा रत्नशास्त्रमगस्ति वृहस्पत्यादिभिरचितं सम्यगवेक्षविषयं संक्षेपमात्रम् । रत्नानाम्वज्रादीनाम्प्रविवेको विचारस्तमधिकृत्यासृ (श्रि) त्य । तथा फल्गु असारम्विसृज्य परिहृत्येत्यर्थः इह बुद्धभटाख्येनाचार्येण संक्षेपमात्रन्दृष्टम् सङ्ग्रहमात्रम्प्रकाशितम् ॥ ततश्चान्यदीयः श्लोकः ॥ वज्रं मुक्तामणयः सपद्मरागाः समरकताः प्रोक्ताः । अपि सेन्द्रनील मणिवर वैदूर्याः पुष्परागाश्च ॥ कर्केतनं सपुलकं रुधिराक्षसमन्वितन्तथा स्फटिकं । विद्रुममणिश्च यत्नादुद्दिष्टः सङ्ग्रहस्तज्ज्ञैः ॥ आकरवर्णौ प्रथमं गुणदोषौ तत्फलम्परीक्षा च । मूल्यञ्च रत्नकुशलैर्विज्ञेयं सर्व्वरत्नानाम् ॥ ये रत्नेषु कुशलाः प्रवीणास्तैरेतानि रत्नानि वस्तूनि संबद्धानि विज्ञेयानि । किम्प्रथमादौ परीक्ष्यमाकरो वर्ण आकरश्चोत्पत्तिस्थानम् । वर्णः सितपीतादिः । गुणदोषौ वक्ष्यमाणौ । तेषाङ्गुणदोषाणाम्फलविपाकः । परीक्षाचेति तुलनमियत्तापरिच्छेदः ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुलग्नेषूपजायन्त इत्यादि ॥ यानि रत्नानि कुत्सिते (षुलग्ने; पू (प) जायन्ते उत्पद्यन्ते यानि च विष्टिव्यतिपाताद्युपहतेऽहनि वासरे उत्पद्यन्ते तानि दोषैर्वक्ष्यमाणैरुपसृज्यन्ते अभिभूयन्ते ॥ तथा गुणानां सम्पदा हीयन्ते । ऊनी क्रियन्त इत्यर्थः ॥ ॥

परीक्षापरिशुद्धानामित्यादि ॥ पृथिवीभृता राज्ञा रत्नानां धारणं कार्यं स्वशरीरे । आभरणस्थन्धारणङ्कार्यम् । सङ्ग्रहो भाण्डागारे वा स्थापनीयम् । कीदृशानां रत्नानाम्परितः समन्तात् जात्यादेः परीक्षाविचारस्तया परिशुद्धानान्निश्चितानां । कीदृशेन राज्ञा श्रियमभीप्सता । भूतिमिच्छता ॥ ॥

परीक्षकलक्षणमिदमुच्यते ॥ शास्त्रज्ञ इत्यादि ॥ शास्त्रज्ञो रत्नशास्त्रपाठकः प्रवीणः यश्च सततं सर्व्वकालं रत्नानान्द (दे) शक (दर्शकः ?) । यस्य तैरत्यन्तं सङ्गतिरित्यर्थः ॥ यश्च देशकालौ जानाति स प्रशस्तः परीक्षको भवति ॥ ॥

शास्त्रविदित्यादि ॥ ये परीक्षपरीक्षायाम धिकृताः शास्त्रवेत्तारः वाङ्मनश्च । तथा कुशलाः प्रवीणास्तथा रत्नभाण्डपरीक्षका रत्नसेविन एवम्विधा ये परीक्षका (स्त) एव मूल्यमात्रा परिमाणन्तस्य च्छेत्तारः परिच्छेदकाः कथिताः ॥ ॥

महाप्रभावमित्यादि । वज्रन्तीव्रन्तद्विबुधैः पण्डितैर्यतः कारणान्महाप्रभावमित्युदाहृतङ्कथितन्ततो हेतोरियम्परीक्षा । वज्रपूर्वा प्रकीर्त्यते । कथ्यते वज्रम्पूर्वं यस्याः सा वज्रपूर्वा ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्यास्थिलेश इत्यादि ॥ तस्य बलाख्यस्यासुराणां पत्युरस्थिलेशः सूक्ष्मास्थि। येषु भुवः प्रदेशेषु निपपात पतितः कथञ्चिदिति न प्राधान्येन। देवैस्तस्यापहृतत्वात्। तेषु प्रदेशेषु वज्राणि भवन्ति उत्पद्यन्ते। कुत्र नानाकरा आकृतिः स्थानम्विद्यन्ते येषान्तेषु। तथा कीदृशस्य बलस्य वज्रायुध इन्द्रस्तं जेतुमिच्छोः सः वज्रायुधनिर्जिगीषुः ॥ ॥

आकरवर्णौ प्रथमम्विज्ञेयौ ॥ प्रथमन्तावदाकरा उत्पद्यन्ते। हिमवत्कलिङ्गेत्यादिना हिमवदादिष्वाकरेष्वाताम्रादयो वर्णतो वज्रविशेषा यथासङ्ख्यमुत्पद्यन्ते क्रमात्कथिताः ॥ यथा हिमवति ताम्रवर्णम्। कलिङ्गे कनकवर्णम्। पण्डेषु श्यामम्। सूरपारनाम्नि सितम्। मतङ्गेषु सिन्दुवारपुष्पसमा रुचिः कान्तिर्येषान्तथाविधानि वज्राण्युत्पद्यन्ते। कोशलेषु पीताः।

सौराष्ट्रेषु शिरीषनिभाः वेण्णा (ण्या) (स्) तटे चन्द्रतुल्याः सुस्वच्छाः ॥ इति वज्राकरस्थानानि ॥ ॥

सुस्वच्छमित्यादिना लक्षणमाह ॥ सुस्वच्छन्निर्मलम्। तथा लघुतुलया। वर्णतश्चातिरिक्तादेर्गुणवत् ॥ सांकर्यहीनं। तथा पार्श्वेषु वक्ष्यमाणलक्षणेषु स्थानेषु सम्यगतिशयेन समं नू(न्यू)नाधिकत्वरहितम् ॥ रेखाबिन्दुकलङ्ककाकपदकाः प्रसिद्धास्तथा ग्रासः स्फुटस्तत्तद्दादिभिर्वर्जितम्। यदि तु तीक्ष्णाग्रधारम्भवति। धारा द्वादश वक्ष्यन्ते। एवम्विधम्वज्रम्परमाणुः मात्रमपि परमाणु प्रमाणमपीत्यनेनैव प्रकारेण गुणेष्वेवादरो विबुधेषु न प्रमाण इति। यतो गुणेभ्य एव गुणप्रसूतिर्वक्ष्यते। तच्च यत्र दृश्यते तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समाश्रयः सन्निधानविशेषः स न वितथः सत्यरूपः । तत्र सर्वे देवा वज्रप्रभावात्सन्निधानङ्कुर्वन्तीत्यर्थः ॥ ॥

वज्रेष्वित्यादि ॥ वज्रेषु देवानां सम्यक्परिग्रहः समाश्रयः सवर्णानां संबन्धिन्या युक्त्या कथितः प्रोक्तः । यश्च वर्णेभ्यो ब्राह्मणादिभ्यो विभागः सोपि वर्णाश्रयादेवाश्रयः कथितः॥ ॥

हरितेत्यादि ॥ इदमपि यथासंख्यमेव तथा च दर्शितमस्य स्वक आत्मीयत्वेन विवक्षितो वर्णः । हरेर्हरितः । वरुण(स्य)सितः । शक्रस्य पीतः । हुतवहस्य पिङ्गः । पितृपतेः श्यामः । मरुद्वायुस्तस्य (स्या) ताम्र ईषल्लोहितः । ते च वर्णाः । कीदृशाः स्वभावतो रुचिरा रमणीयाः ॥ इदानीम्विप्रस्येत्यादिना ब्राह्मणादिविभाग उच्यते॥ ॥

शङ्खश्च कुमुदश्च स्फटिकश्च तदिव तद्वदवदातः शुद्धः स विप्रस्य ब्राह्मणस्य स्वकोवर्णः । वभ्रुर्नकुलः शशश्च वभ्रुश्च तयोर्विलोचने नयने तत्तुल्या आभा कान्तिर्यस्य स क्षत्त्रियस्य स्वको वज्रवर्णः । तथा कान्तः कमनीयः कदलीदलनिभः स्यात्स वैश्यस्य स्वको वज्रवर्णः । प्रज्वालितो यः खड्गस्तस्य या दीप्तिस्तया सदृशः शूद्रस्य स्वकोवज्रः (वर्णः?) । ॥

सद्भिः सज्जनैर्वज्राणाम्पृथिवीभृतां राज्ञां द्वौवर्णौ प्रदिष्टौ कथितौ । जवा बंधूकं विद्रुमः प्रवालस्तस्य भङ्गो विद्रुमभङ्गः । जवा च विद्रुमभङ्गश्च तद्वच्छोणितो लोहितो यः स्याद् यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवेत् । यो वा हरिद्रारससन्निकाशस्तद्वर्णः । रक्तपीताविति-
त्यर्थः ॥ ॥

तस्माद्ब्राणादीनाम्वर्णानामधरोत्तरवृत्या आधा (अध)
राणां क्षत्त्रियादीनामुत्तरे ब्राह्मणादौ वृत्या प्रधानत्वेन
याद्वग्वर्णसङ्करो जायते । वैश्याद्वैदेहिकः । शूद्राच्चाण्डालः ।
यस्तु वज्राणां सङ्करस्ततोपि कष्टतरः ॥ ॥

ईशत्वादित्यादि । गुणवद्वज्रन्धारयेत्सर्ववर्णाधिपती-
राजा । ततः सार्ववर्णिकम्वज्रन्तस्यधारणमविरुद्धम् । कथ
न्धारयेत् कामत इच्छातः । अत्र हेतुमाह ॥ सर्वेषां वर्णानां
ब्राह्मणादीनामीशत्वात्प्रभुत्वात् ॥ ॥

एकमपीत्यादि ॥ यस्य वज्रस्य एकमपि शृङ्गङ्कोटिर्विदलि-
तमवलोक्यते दृश्यते विशीर्णं स्फुटितं वा तत्तथाविधं वज्रङ्गु-
णवदपि श्रेयोर्थिभिर्भवने नधार्यङ्गृहात्परित्याज्यम् ॥ ॥

स्फुटिताश्रीत्यादि ॥ स्फुटिता अश्रयो यस्य तत्स्फुटि-
ताश्रि । अश्रि अगृधारन्तथा विशीर्णं शृङ्गकोटिभागो यस्य ।
तथा मलवर्णैः कृष्णैः स्पृषतैस्तिलकैरुपेतं समन्वितं मध्यं
तत्तथाविधं वज्रं वज्रभृतोपि इन्द्रस्य सतीमैन्द्रीं श्रियमन्याश्र-
यलालसामपरगृहाभिलाषिणीन्न नकुर्यात् । अपितु कुर्यादेष ।
एकदुक्तम्भवति । इन्द्रस्यापि तथाविधं वज्रं श्रियमपहार-
येदिति यस्य वज्रस्यैकदेशोवयवः क्षतजो रक्तन्तत्तुल्योऽवभासः
कान्तिर्यस्य क्षतजमिव भसते वा तद्वल्लोहितै रक्तै र्बिन्दुभि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचित्रम्भवेत् । तथाविधं वज्रन्धियमाणं स्वच्छन्दमृत्योः पुरुषस्य जीवितान्तन्न नकुर्यादपितु कुर्यादेव ॥ ॥

षट्कोटीत्यादि ॥ एवम्विधम्भुवि भवेत्सुलभन्न वज्रम् ॥ पृथिव्यां सुलभन्नभवेत् । दुर्लभं भवतीत्यर्थः ॥ षट्कोटिभिः षट्कोणैर्यच्छुद्धन्तीक्ष्णममलं मलादिविनिर्मुक्तं स्फुटास्तीक्ष्णाः प्रकटा धारा यस्य । तथा वर्णेन शुक्लादिना असङ्करेणान्वितं लघु लाघवान्वितं शोभनैः पार्श्वैः समैर्युक्तम् । अपगतकलङ्कादिदोषन्तथा इन्द्रायुधमिवांशूनां रश्मीनां विसृतिः प्रसरणं तया च्छुरितमन्तरिक्षं नभो येन । तदेवम्विधं वज्रं पृथिव्यामतुर्लभम् ॥ ॥

तथाविध वज्रधारणफलमाह तीक्ष्णेत्यादिना ॥ तीक्ष्णा अश्रि(:) अग्रधारो यस्य । तथा विमलं मलविमुक्तम् । अपगता अपेता सर्वदोषा रेखाबिन्द्वादयो यस्य । तथा विधं वज्रं यो धत्ते धारयति प्रयततनुः शुचिः सदा सर्वकालन्तम्पुरुषम्वृद्धिः प्रदिदिनमवैति गच्छति । केषां श्रीसम्पत्सुतधनधान्यगोपशूनां श्रिया लक्ष्म्या सम्पद्वृद्धिस्तत्राधिकारम्प्रभुत्वम् ॥ ॥

व्यालेत्यादिना तथाविधवज्रधारणस्यापरमपि फलमाह ॥ सिंहादयश्च । अग्निजलचौरादिभयानि तस्य निवर्तन्ते । दूरादेव नश्यन्ति । नश्यन्तीत्यर्थः । मारणादि सर्वकर्मण्यपि ॥ ॥

यदीत्यादिना तथाविधवज्रस्य मूल्यमाह ॥ अपगतसर्वदोषमपगतसर्वायाशं यद्वज्रन्तद्यदि गुरुत्वम्बिभृयात् गौरवन्धारयेत्किम्परिमाणं विंशतितण्डुलसंख्यापरिमाणम्वदन्ति । मणिविदः शास्त्रविदश्च एतद्विदो वदन्ति । द्विगुणं रूपकानां लक्षमग्रमूल्यम् । प्रधानमूल्यं हे लक्ष्ये (लक्षे) इत्यर्थः ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुतामित्यादि ॥ सर्वेषां रत्नानां पद्मरागादीनां वक्ष्यमाणानां गुरोर्गौरवाधानस्य गौरवोत्पादनस्य गुरुत्वं कारणं हेतुस्तां वज्रवैपरीत्येन व्यत्ययेन सूरयः पण्डिताः परिचक्षते। अन्ये मणयो गुरवः सन्तो महार्घा वज्रन्तु लघु महार्घमित्यर्थः ॥ ॥

यः खलु आत्मानं विद्वांसं कर्तुकामस्तेनान्यदपि शास्त्र श्रोतव्यम् ॥ तदुक्तम् ॥

इत्थं रत्नप्रविषयमिदं वीक्ष्य सम्पत् (सम्यग् ?) सुबुद्धया
शास्त्राण्यन्यान्यपि च विधिवत्सज्जनादाकलय्य ।
प्रायः कृत्वा विदितसकलन्देशकालानुसारं
योग्यस्तस्मात्समणिगुणविद्वेत्ति दम्भोलिमूल्यम्॥ ॥

इत्थमनेन प्रकारेण सम्यक्तंबुद्धया सुनिश्चितात्मीयमतिविभवानुसारेण रत्नप्रविचयमिदमवेक्ष्य । तथा सज्जनात्साधुजमान्न यावता केवलं रत्नशास्त्रमन्यान्यपि च शास्त्राणि आकलय्य सम्यग्विधिवद्ग्राह्याणि स्वज्ञातानि कृत्वा ततः प्रायो बाहुल्येन देशकालानुसारम्विदितसकलं कृत्वा। देशश्च कालश्च देशकालौ । तयोरनुसारेणानुसारज्ज्ञानमग्रं कृत्वा । अतो दम्भोलिमूल्यं स मणिगुणविद्वेत्ति जानाति यतः स योग्यः समर्थः ॥ ॥

सर्वैरित्यादि । यत्तु वज्रं सर्वैः पूर्वोक्तैर्गुणैर्युक्तं सद्धारिणि जलेपि तरद्विद्वतीयतटं प्राप्नोति तस्य धारणमिष्यते । रत्नानां वर्गे संघाते समस्ते समग्रेपि पूज्यत इत्यर्थः ।

॥ ० ॥ वज्रपरीक्षा समाप्ता ॥ ० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ मुक्ताफलपरीक्षा

॥ ॥ द्विपेन्द्रेत्यादि ॥ लोके मुक्ताफलानि प्रथितानि ख्यातानि । कीदृशानि हस्तियूथपतिमेघसूकरकम्बुतिमिसर्प्पशुक्तिवंशाः ॥ तस्मादुद्भवो यस्य ततो जातम्वेणुदण्डेषु मध्याच्छुक्त्युद्भवम्भूरिबहुलम् । अन्यानि तु विरलानि भवन्ति ॥ ॥

तस्यैवेत्यादि ॥ तस्यैव शुक्त्युद्भवस्य एकस्य मूल्यमात्रा मूल्यमानम् । अपरस्य न जातु कदाचित् शुक्त्युद्भवमेव वेधयोग्यम् ॥ शेषाण्य वेध्यानि न वेधयोग्यानि ॥ ॥

त्वक्सारेत्यादि ॥ त्वक्सारो वेणुः नागेन्द्रो हस्तिवरः । मत्स्यः । तेभ्यो यत्प्रसूतं । यच्च शङ्खजं कांत्या बाहुल्येन विमुक्तानि विरहितानि भवन्ति । स्वभावत उत्पद्यन्ते । गजशङ्खसूकरवेणुप्रभवा प्रभाहीनाः सदैव । तथापि माङ्गल्यतया पूज्यानि प्रशस्तत्वेन पूजनीयानि ॥ ॥

येत्यादि ॥ रत्नानां ये विनिश्चयं जानन्ति ये सम्यक्परीक्षकास्तैर्या मौक्तिकानामष्टौ योनय आकराः प्रकीर्तितास्ते ष्वाकरेषु मध्येषु यत्कम्बूद्भवं शङ्खजातं यच्च गजस्य कुम्भादुत्पद्यते तदधमम्प्रदिष्टम् ॥ ॥

स्वयोनीत्यादि ॥ शङ्खस्येदं शाङ्खं । कीदृशं, स्वयोनिःशङ्खस्तस्य मध्यच्छविः कान्तिस्तत्तुल्यवर्णं । तथा बृहत्कोलफलं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वदरफलन्तत्प्रमाणं । वारणो हस्ती, तत्कुम्भमध्यांद्यदुत्पद्यते तथाऽऽपीतमीषत्पीतं । तथा प्रभया विहीनं कान्त्या न्यूनम् ॥

ये कम्बव इत्यादि ॥ते तथा विधाः शङ्खा गजाश्च मौक्तिकानां प्रभवा योनयः प्रदिष्टाः कथिताः । शङ्खाश्च कीदृशाः । ये कम्बवः शङ्खाः । वासुदेववदनस्पर्शधृतास्तेषां वंशे यो जातः पाञ्चजन्य इत्यर्थः । मातङ्गा दन्तिनः । ये ऐरावतादयस्तदुत्पन्नानाञ्च विशुद्धवंशानां मौक्तिकानां निर्दिष्टाः ॥ ॥

पाठीनेत्यादि ॥ मीनाद्यदुत्पद्यते । तत्कीदृशं । पाठीनो मत्स्यविशेषस्तस्य यत्पृष्ठं तत्समानो वर्णो यस्य । तथा सुष्ठु वृत्तं वर्तुलं यस्य नचातिसूक्ष्मं । लघु गौरवेण हीनं । तेषु च वारिचराणां मत्स्यानां मीन (ना) स्तेषूत्पद्यन्ते समुद्रस्य मध्ये भवन्ति ॥ ॥

वराहेत्यादि ॥ कथञ्चिद्विरलतया विविक्ते निर्जने भूप्रदेशे स सूकरराड्वराहेन्द्रो जायते । यस्य दन्तोद्भवं तथा दन्तोकृतिसमानरूपं मुक्ताफलमुत्पद्यते ॥ ॥

वर्षोपलेत्यादि ॥ यत् त्वक्सारमध्यप्रभव वेणुदारुसमुत्थं तद्वर्षोपलसमानरूपमशनिसदृशशोभं तत्, प्रदिष्टमुक्तम् । येषु मुक्ताफलान्युत्पद्यन्ते ते वेणवो न सर्वत्रोत्पद्यन्ते । अपितु सिद्धाश्रमे प्ररोहन्ति । सिद्धा अष्टसिद्धिसंयता उच्यन्ते । तैरुपभोग्य (ग) योग्ये भूप्रदेशे जायन्ते ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भौजङ्गमित्यादि ॥ भुजङ्गमाज्जातं भौजङ्गमं सांपं, तन्नीलं विशेषेण शुद्धं निर्मलं वृत्तं वर्तुलं भवति । तथोज्ज्वला वर्णशोभा यस्य तथा नितान्तश्वेतः अतिशयेन प्रख्या-(क्ष्या)लितः । विशेषेण च कम्पमानः प्रचलो यो निस्त्रिंशः खड्गस्तेन समाना वर्णशोभा यस्य ॥ ॥

प्राप्येत्यादिना भौजङ्गमस्य मुक्ताफलस्य प्रभावमाह ॥ सर्पशिरः समुत्थस्य भाजो न भवन्ति तेऽधिष्ठातारो न सम्पद्यन्ते । किं कृत्वा– महा प्रभावाणि दीप्तिमन्ति रत्नान्यपि प्राप्य लब्ध्वापि तथा धनं श्रियं दुरापान्दुरधिगमां महतीं धिस्तीर्णाश्च प्राप्यापि येऽपुण्यकृतः सकल्मषास्ते तन्नसेवन्ते ॥ ॥

जिज्ञासयेत्यादिना श्लोकद्वयेनाहिशिरोभवस्य मुक्ताफलस्य प्रभावान्तरमाह ॥ अहिशिरोभवं मुक्ताफलरत्नवरं रत्नानां श्रेष्ठं । तदा हर्म्यस्योपरिस्थं धवलगृहपृष्ठे कार्यम्, । किमिति जिज्ञासया परिज्ञानार्थं किमिदं सर्पमस्तकसम्भवं भवत्युत नवेति । कैर्विबुधैर्विधिज्ञैः, विधिः समाचारस्तज्ज्ञानन्तीति । यदा शुभे मुहूर्ते प्रशस्तेकाले प्रयतैः शुचिभिस्तथा प्रयत्नाद्यत्नतः । तथा सुमहदिति प्रभावः रक्षाविधानम्प्रति स (श) रादि विधाय कृत्वा, तदा किं भवत्याह– तदा तस्मिन्काले घनैर्घनैरतिनिविडैः पयोदैर्नभोऽन्तरिक्षमाव्रियते व्याप्यते । अन्यच्च कीदृशैः । महादुन्दुभिमन्द्रघोषैः बृहत्पटहगभीरशब्दैस्तथा पयोधराक्रान्तिविलम्बिबिम्बैः, जलगौरवाम्भः प्रेङ्खच्छरीरैस्तथा तडित्सदापूरितमध्यभागैः ॥ ० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न तम्भुजङ्गेत्यादिनान्यच्चाहिशिरोजातस्य मुक्ताफलस्य प्रभाव-माह । यस्याहिशिरः समुत्थं मुक्ताफलन्तिष्ठति पूज्यमानं तं भुजङ्गादयो मुक्ताफलस्य प्रभावान्न हिंसन्ति ॥०॥

नात्येतीत्यादिना मेघमुक्ताया लक्षणमाह । मेघप्रभवं मुक्ताफलन्तद्धरित्रीन्नात्येति भूमिं न प्राप्नोति। अत्र कारणमाह। यतस्तन्मुक्ताफलं वियद्गतमाकाशस्थं विबुधा देवा हरन्ति। तस्य कान्तिमाह । अर्चीं (र्चीं) षि दीप्तयस्तासाम्प्रभावः समूहस्तेनावृतश्छादितो दिशस्त्रिभागो येन, आदित्यवत्सूर्य-वद् दुःखविभाव्यबिम्बं दुर्दर्शस्तेजः पुञ्जः (ञ्जं) तत् । मेघ मुक्ताफलं येन प्रकारेण दिवा दीप्तिकरमहर्निशरश्मित (स्त) थैव तेनप्रकारेणैव शर्वरीष्वपि रात्रिष्वपि तिमिरावृताम् । किङ्कृत्वा-हुताशन (ने) न्दुनक्षत्रनागग्रहास्तेभ्यो जातं यत्तेजो दीप्तिस्तत्तिरस्कृत्याभिभूय । तत्र हुतमश्नातीति हुताशनो-ऽग्निः, इन्दुश्चन्द्रः, नक्षत्राणि तारकाः, नागाः सर्पाः, ग्रहा भौमादयो मेघप्रभवस्य मुक्ताफलस्य कृत्स्ना निःशेषा मही पृथिवी मूल्यं भवेन्न भवतीति वा । कीदृशीं महीं सुवर्णपूर्णां हाटकपूरितां निश्चयो ममेति प्रतिज्ञा मम । तथा विचित्राऽनेक-वर्णा रत्नानां द्युतयः कान्तयस्तोभ्यः सारं श्रेष्ठं तोयं जलं येषां तथाविधाश्चत्वारःसमुद्रास्त एवाभरणानि तैरुपपन्ना ॥ अत्रहेतुमाह । हीनोऽप्यधमवंशजोऽपि पुरुषस्तन्मुक्ताफलं कदाचिद्यथाकथञ्चिन्महतोऽपि सञ्चितस्य सुकृतस्य विपाकयोगा-त् कर्मणो वा । तदा तत्प्रभावात्समस्तां निःशेषां पृथिवीं भुनक्ति पालयति सपत्नहीनां निःसपत्नाम् । कियत्कालं । यावदेत-मुक्ताफलं तिष्ठति । पुण्यक्षयादन्तर्धानं भवति। तन्मुक्ताभ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(क) लं न केवलं नृपस्य राज्ञः शुभकृत्कल्याणकरम्। यावता तस्य यज्जन्म तत्प्रजानां भाग्यैः करणभूतैः शुभमभिमुखं यत्र प्रजानां तस्य जन्म। अत्रोत्पत्तिमाह। परितः समन्तात्सहस्रयोजना स (त्स) र्वाननर्थान्दोषान् विमुखी करोति निवर्तयति ॥०॥

नक्षत्रेत्यादिना शुक्त्युद्भवानां मुक्ताफलानां लक्षणमाह। तस्य महासुरस्य दन्तावली दन्तपङ्क्तिर्दिवौ (वो) विशीर्णा नभसःपतिता। अत उत्प्रेक्षा क्रियते — नक्षत्रमालेव नक्षत्रपङ्क्तिरिव सा जलानां पत्युः समुद्रस्य श(स)लिले पपात पततिस्म। कीदृशे श (ल) लिले रत्नद्युतिभिरनेकवर्णैः शबले। विशुद्धवर्णा धवलद्युतिः। किञ्च, तस्य मणिप्रवेकस्य रत्नश्रेष्ठस्य। कीदृशस्य संपूर्णश्वासौ चन्द्रः संपूर्णचन्द्रस्यांशुकलापो रश्मिसमूहस्तत्तुल्या कान्तिर्यस्य। तथा महागुणस्य मुक्तारत्नस्य यद्बीजं दन्ताख्यं तच्छुक्तिमत्प्राणिविशेषकारणानि मुक्तानां पठितानि तान्यपि प्राप्नुवत्। किञ्च। शुक्तेरुद्भव उत्पत्तिर्यस्य तन्मुक्ताफलं नात्यन्तविकृष्टवर्णं प्रमाणं स्थौल्यं संस्थानमाकृतिः, गुणा वक्ष्यमाणाः प्रभाः कान्तिस्तैरुपलक्षितं बर्बरादयो जलधिजलवासिनो जलविषयास्तेषूत्पद्यन्ते। तस्य तथाविधस्य ये आकारप्रतिपादकान्विशेषा न्नचिन्त्यात् न निरूप्यात्। तथा रूपप्रमाणयोरप्याकारोपलणं न बोद्धव्यम। न च गुणदोषा वाच्याः। यतः सर्वेष्वेवानन्तरप्रकारेषु देशेषु सर्वाकृतयो मुक्ता भवन्ति ॥०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकस्येत्यादिना । शुक्तिप्रभवं यन्मुक्ताफलं तस्यैकस्य कीदृशस्य मानाख्यः प्रमाणविशेषस्तेन समुन्मितस्य तुलितस्य, चत्वारो माषका मानं तथाविधस्य रूपकाणां पञ्चसहस्राणि त्रिभिः शतैरभ्यधिकानि मूल्यम् ॥०॥

इति मुक्ताफलपरीक्षा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ पद्मराग (मणि) परीक्षा।

दिवाकरेत्यादि । तस्य महाबलस्य बलाख्यस्यासुरस्य सम्बन्धी, असृक् रक्तं गृहीत्वा स दिवाकर आदित्यः । नभस्तलेन प्रतस्थे (प्र) स्थितवान् । कीदृशस्य बलस्य । महामहिम्नो महान् महिमा यस्य । कीदृगसृक् । उत्तमरत्नबीजं ..... पद्मरागस्य रत्नविशेषस्य बीजभूतं कीदृशेन नभस्तलेन । निस्त्रिंशनीलेन खड्ग कृ ....ना ॥०॥

क्षेत्रेत्यादि । तद्रत्नबीजमसृग् रुधिरं सूर्य आदित्यः सरिदुत्तमायां महानद्यां मुमोच त्यक्तवान् । किङ्कृत्वा । लङ्काधिपेन रावणेन सह विरोधं समेत्य विग्रहं प्राप्य । कीदृशेन रावणेन । अजस्रमनवरतं सुराणां देवानां समरे आजौ जयनशीलेन पराभव कारकेण । तथा वीर्यं बलं तेन, अवलेपो गर्वस्तेन, उद्धतमुत्कटं चित्तं यस्य तथाविधेन रावणेनोत्प्रेक्षा क्रियते । क इव केन स्वर्भानुनेव राहुणा यथा परवशी क्रियत एवं तेन । कीदृश्यां नद्यां । सिंहलो जनपदविशेषस्तस्य याः स्त्रियस्ताः सैंहलास्तासां चारुणि रमणीयाणि नितम्बबिम्बानि गुह्यमण्डलानि तैर्विक्षोभितश्चालितः । अगाधो दुरधिगमो महाह्रदः प्रवाहो यस्याः, पूगद्रुमाः पूगवृक्षास्तैश्छादितं तटद्वयं पारावारं यस्याः । कुलकमिदम् ॥९॥

तत इत्यादि । सा महानदी ततः प्रभृति रावणगङ्गेति प्रथिमानं ख्यातिमुपगता । कीदृशी सा गङ्गा तुल्यः समानः पुण्यकलानां शुभकर्मविपाकानामुदयो यस्याः ॥ ० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्या रावणगङ्गायास्ततः प्रभृति कूलानि विभान्ति शोभन्ते । कदा । शर्वरीषु रात्रिषु । कीदृशानि कूलानि । रत्नैः पद्मरागाख्यैर्विचितानि व्याप्तानि च तटोपलानि पाषाणविशेषाणि येषां । कुकूलवन्हिस्तुषाङ्गारस्तस्य प्रकरैः समूहैरिव ॥ ॥

तस्या इत्यादि ॥ तस्या रावणगङ्गायास्तटेषु पार्श्वेषु पद्मरागाख्या मणयो भवन्ति । कीदृशा उज्ज्वलाश्चारु रमणीयो रागो लोहितो येषाम् ॥०॥

एषाञ्च जातित्रयमाह सौगन्धिकेत्यादि । ये स्फटिकजाः पद्मरागास्तेषां लक्षणमाह । बन्धुकादि प्रसिद्धाः स(श)कलमधं, इन्दु(न्द्र)गोपः प्राणिकीटको जवा पुष्पविशेषः शशरुधिरमेतैः समाना वर्णशोभा येषां तथा भ्राजिष्णवः शोभमानाः किंशुकाख्यो वृक्षविशेषस्तत्पुष्पसदृशी भा येषाम् ॥ ॥

तुषोपसर्गेत्यादि । कलशाभिधानाः कलशपुरोत्पन्नास्ते तुषोपसर्गास्तुषव्याप्ता लक्ष्यन्ते । तुम्बुरूत्थं तुम्बुरुदेशजातं, आताम्रवर्णादाताम्रिकया सिंहलदेशजातं कार्ष्णितया मुक्ताभिधानं मुक्तासंज्ञा, नभसः स्वभावादाकाशवन्नीलतया श्रीपूर्णकाख्यः कान्तिरहितत्वेन । एष विजातिर्नीलो लक्षणभेदः ॥०॥

यः पद्मरागस्ताम्रिकां पुष्यति कालिकां धत्ते । यो वा तुषैरिव पूर्णो लक्ष(क्ष्य)ते। यश्च स्नेहेनैव प्रदिग्धो लिप्तो लक्ष(क्ष्य)ते यो वा वस्त्रादिना प्रघृष्टो घृष्टः संयुक्तो वा दीप्तिं जहाति समलो लक्ष(क्ष्य)ते । तथाङ्गुलीभ्यामाक्रान्तश्च यः पार्श्वे कालिकां धारयति । यश्च जात्या प्रमाणेन तुल्यः सन् लाघवेन युक्तो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथवा स आकरेऽपि जातो जातिगुणहीनत्वादुपेक्ष (क्ष्य:) । अथवा नक्तंशोभां मध्यच्छायां प्राप्य जातिगुणान्न पश्यत्य-ज्ञत्वात् । अतोऽपि यदि तं मणिं धनेशो धारयति सोऽप्यवश्यं नाशं याति तस्य माहात्म्यात् ॥७॥

यदा तु विजातिसन्देहो न निवर्तते तदा शीना (शाणा) वां परिलेखयेत् । अथवा स्वजातिसमुत्थेनान्येन पद्मरागेण परस्परं विलिखेत् । वज्रं पद्मरागं वा वर्जयित्वा पद्मरागेन्द्र-नील्योरन्येन लेखनं कर्तुं नशक्यम् ॥७॥

गुणोपपन्नेत्यादि । विजात्यो मणिः सगुणोऽपि सन् नान्येन गुणोपपन्नेन सह धारणीयः । यस्तु जात्यगुणरहितोऽपि सजात्येन गुणवता सह धारणीयः । विजात्यस्तं पुनः कौस्तुभेनापि सह बुधो न बिभृयात् न धारयेत् ॥७॥

वज्रस्येत्यादिना पद्मरागाणां मूल्यमाह । पद्मरागस्य महागुणस्य तन्मापकव्यातुलितस्य मूल्यमुक्तं । कीदृशस्य तण्डुलानां सङ्ख्यया समुन्मापितं परिच्छ(च्छि)न्नं गौरवं यस्य तदेव पद्मरागस्य अयं पुनर्विशेषः । माषकतुलितस्य माषक परिच्छिन्नस्य ॥७॥

॥ इति पद्मरागपरीक्षा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ मरकत (मणि) परीक्षा

दानवाधिपतेरित्यादि। भुजगाधिपो वासुकिः सत्वरं वेगवद्भवान्। किं कृत्वा। दानवाधिपतेर्बलस्य पित्तमादाय गृहीत्वा कथं व्योमाकाशं द्विधा कुर्वन्निव ॥०॥

सहसैवेत्यादि। स फणीन्द्रो वासुकिस्तत्पित्तं गरुत्मताक्रान्तः सहसैव मुमोच झगिति तत्याज। क, अवनीन्द्रस्य गिरेः उपत्यकायां निकटभूमौ। कीदृश्यां स्वरसेनाभ्यक्त इव सस्नेह तुरुष्काख्यस्य गन्धद्रव्यमेव तद्वनानां यो गन्ध आमोदस्तेन वासितायां सुरभितायाम् ॥०॥

ततः क्षितेःस्थानं स प्रदेशो मरकताख्यानां मणीनामाकरतां-जगाम प्राप्तवान्। कदा, तस्य पित्तस्य पातः प्रक्षेपण प्रपतना त्तत्समनन्तरं तत्क्षणतामेव तुल्यकालमेव । वबरा जनपद विशेषास्तेषामालयं स्थानमतिक्रम्य रुमासमीपे मरुभूमि-निकटे, उपपयोनिधितीरलेखं पयोनिधिः समुद्रस्तीरलेखा-समीपे ॥०॥

तत्र जलनिधिभूमौ मरकताख्या मणयो भवन्ति उत्पद्यन्ते। कीदृशाः अप्रत्यग्रो यो मौशुकस्तस्य कण्ठनीलस्तथा शिरीषाख्यस्य वृक्षस्य तत्पुष्पं खद्योतः प्राणिविशेषस्तस्य पृष्ठं नवस(शा)ड्वलादि प्रसिद्धम् ॥०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भल्लातक्यास्त्य एकः । पुत्तिका द्वितीयकः । काचस्तृतीयकः ॥०॥

कथं य एतेन समं वर्णं योगं धारयति । किं कस्य लक्षणमाह । क्षौमेण क्षुमानिर्मितेन वाससा । घृष्टमपि पुत्तिकां दीप्तिं त्यजति । काचस्य च लघुत्वभावेन लक्षणं वक्तुं कथितुं शक्यम् ॥ ॥

कीदृशः । अनेकरूपैर्बहुभिर्गुणैर्यो मरकतमनुगच्छतोऽप्यनुकुर्वतोऽपि । कस्यचिदिति । न सर्वस्य नहि सर्वेऽपि सर्वे भल्लातकाः सर्वगुणैर्मरकतसदृशाः ॥ ॥

स्नानाचमनेत्यादि । बुधैः पण्डितैर्मरकतं धार्यं धारणीयं । कीदृशं । दोषैः पूर्वोक्तैर्हीनं रहितं । गुणैः पूर्वोक्तैरेव युक्तं । यथा काञ्चने सुवर्णे प्रतियोजितं प्रतिबद्धं । कीदृशैर्धार्यं कदा तदाह । स्नानाचमनजाप्येषु तथा रक्षायां मन्त्रक्रियाणां विधौ निष्पादने । गां ददद्भिर्वितरद्भिः । हिरण्यादाँश्च हिरण्यं सुवर्णं । आदिग्रहणाद्रजतभूम्यादिसाधनानि भूतवेताल रसवादान् कुर्वद्भिः । तथा देवेषु देवपूजासु पित्र्येषु श्राद्धक्रियासु आतिथेयेषु अतिथिपूजासु गुरूणां संपूजनेषु च । तथा विषोद्भवैर्विविधैरनेकाकारैश्चौषधिजातैर्यं बाधितुमारब्धास्तैर्धार्यं विषदोष निवृत्तये । अत्र क्वचित्पवित्रकारणं क्वचिद्रक्षोघ्नता । क्वचिद्देवतासन्निधानमेव एवमादयो विशेषाः सङ्ग्रामे चरद्भिश्चेति ॥ ॥

तुलया तुलापरिच्छेदेन वज्रस्य तण्डुल संख्यया । पञ्चरा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गस्य तु माषकैः । एवं विधेन प्रकारेण यन्मूल्यमुपदिष्टं । ततोऽधिकं मूल्यं मरकतं लभते । कीदृक् । यद्गुणैः शुभैर्युक्तं । किञ्च, पद्मरागाणां दोषैर्युक्तानां यथा मूल्यं तथैव मूल्यहानिर्भवति ।

॥ इति मरकतपरीक्षा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथेन्द्रनील (मणि) परीक्षा

तत्रेत्यादि। तत्रैव समुद्रतीरोपलक्षिते देशे यस्य बलस्य नेत्रयुग्मं पपात। कीदृशे। सिंहलानां जनपदानां वधूः (ध्व) स्तासां करपल्लवाग्रैर्व्यालूनाः स्फोटिता बालानां लघलीनां लता-विशेषाणां कुसुमसहिताः प्रवाला यत्र। तथाविधं नेत्रयुग्मं कीदृङ्। नितान्तेनातिशयेन कान्तं कमनीयं तथा उत्फुल्लानि विकसितानि नीलजलजानि नीलोत्पलानि तत्समा द्युतिर्येषां उपशल्यभूमिर्निकटभूर्विभाति शोभते। कीदृशी, सान्द्रानि [णि] घनानि इन्द्रनीलानि नीलमणिरत्नानि तैश्चता व्याप्ता कथं तत्प्रत्ययात्तस्य नेत्रयुगलस्य प्रभावयोगात्। कीदृशी भूमिः। उभयविस्तर्णो यो बहुनो भावो बहुभावस्तेन भाविता व्याप्ता विस्तारिणी विस्तीर्णाः ॥ ॥

तस्मिन्देशे इन्द्रनीलाश्च मणयो भवन्ति उत्पद्यन्ते। कीदृशाः असिताब्जं नीलोत्पलं हलभृद्बलभद्रस्तस्य वसनं पर्री (रि) धानं, स हि नीलवासा देहस्य विशुद्धत्वादिति श्रुतिः। असिः खड्गस्तस्य पृष्ठं। शार्ङ्गायुधो वासुदेवस्तस्याङ्गं शरीरं। हरः उमापतिस्तस्य कण्ठो गलः। कलायाम्वेष्टिका-धान्यं तस्य पुष्पाणि। गिरिकर्णिका ओषधिस्तस्याः कुसुमैश्च। कीदृग्भिः शुक्लेतरं नीलैरेभिरनन्तरोक्तैर्वसुभिः सदृशोऽवभासः कान्तिर्येषाम् ॥ ॥

प्रसन्नमकलुषं पयो जलं तस्य तथाविधो यः पयसां-निधिः समुद्रस्तदीयबुबुदतुल्यास्त्विषो द्युतयो येषां।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिखी मयूरस्तस्य कण्ठनिभा नीलीद्रव्यविशेषस्तस्या रसो विस्रावस्तत्प्रभवा उत्पद्यन्ते । ये बुद्बुदास्तन्निभास्त-त्सदृशाः सं मदोन्मत्तः कोकिलोऽन्यपुष्टस्तकण्ठनिभा भाः कान्तिर्येषाम् ॥ ॥

तस्मिन्नद्रौ एवं प्रकारा इन्द्रनीलमणयो जायन्ते ॥ कीदृशाः । विस्पष्टाः स्फुटा या वर्णशोभा अवभासन्ते विराजन्ते तथा गुणा मुक्ताफलोज्वलाः ॥ ० ॥

त एव हीन्द्रनीलमणयस्तत्र भूरय एवं विधा जायन्ते । कीदृशाः । अभ्रकापटलोच्छन्नाः । अभ्रका मेघास्तेषामापटला खण्डास्तेश्छन्ना या वर्णशोभास्तासां वर्णदोषैर्दूषिता ये तान्सूरयः पण्डिताः शास्त्रेषु मणिशास्त्रेण संबोधिताः प्रकटी-कृता बुद्धिर्येषां । तथाविधास्तान्नशंसन्ति नस्तुवन्ति नार्द्रयन्त इत्यर्थः । ॥ ० ॥

पद्मरागमणेर्धार्यमाणस्य ये गुणा धनारोग्याद्य आदिष्टा-स्तानेव गुणानिन्द्रनीलस्य धारणान्मानवो मनुष्यः प्राप्नोति ॥०।

अग्नौ क्षिप्तः सन् पद्मरागो यावन्तमग्निं चक्षुरमेत्सहते । तस्मात्कालादिन्द्रनीलमणिस्तस्मात्सुमहत्तरं कालमग्निं न सहते ॥ ॥

यैः प्रत्ययैरुपायैः परीक्षायां पद्मरागः परीक्ष्यते । त एवेन्द्र-नीलमणेः प्रत्ययैर्दृष्टाः शास्त्रान्तराचार्यैर्लोकिता इत्यर्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्मात्तस्य मणिरग्नौ क्षिप्तः सन् न क्षेपमात्रपरिज्ञानाय परिकल्पयति । किन्तु तावति कल्पते । तेन दोषेण दूषितः केतुस्तथाकारयितुश्चानर्थाय भवेदुपद्रवाय जायते ॥ ० ॥

इतोऽस्मिन् शास्त्रे इमे दृष्टप्रत्यया विजातयः पण्डितैः कथिताः । इन्द्रनीलेन मणिना सदृशास्तुल्यवर्णाः । के, प्रथमा काचोपल-करवीरस्फटिकास्तथा । आदि ग्रहणादन्ये सह वैडूर्येण वर्तन्त इति सवैडूर्याः ॥ ० ॥

यथा कश्चिदिन्द्रनील आभया कान्त्या सुवर्णतां शोभ ...

(अतः परं खण्डिता)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection